कार्य्यमसृष्टं सत् तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं सृष्टं गृह्यते। ततः संवेष्टितपटप्रसारितपटन्यायेनानन्यत् कारणात् कार्य्यमित्यर्थः" भा०। सां०कौ० कारणात् कार्य्यस्यानन्यता दर्शिता यथा "कार्य्यस्य कारणाभेदसाधकानि च प्रमाणानि। न पटस्तन्तुभ्योभिद्यते तद्धर्मत्वात् इह यद्यतोभिद्यते तत्तस्य धर्म्मो न भवति यथा गौरश्वस्य। धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम्। उपादानोपादेयभावाच्च नार्थान्तरत्वम्। नार्थयोरुपादानोपादेयभावः यथा घटपटयोः उपादानोपादेयभावश्च तन्तुपटयोः। तस्मान्नार्थान्तरत्वमिति। इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावात्। पदार्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः" नचेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वमिति। इतश्च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्य्याग्रहणात्। इह यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वान्तरकार्य्यं गृह्यते यथैकपलिकस्य स्वस्तिकस्य यो गुरुत्वकार्य्योऽवनतिविशेषोऽधिकः न च तथा तन्तुगुरुत्वकार्य्यात् पटगुरुत्वस्य कार्य्यान्तरं दृश्यते तस्मादभिन्नस्तन्तुभ्यः पटइति। तान्येतान्यवीतान्यभेदसाधनानि। तदेवमभेदे सिद्धे तन्तव एव तेन तेन संस्थानभेदेन परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः। स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात्। यथाहि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतामुत्पादः सतां वा निरोधः। यथाह भगवान् कृष्णद्वैपायनः "नासतोविद्यते भावो नाभावो विद्यते सतः" इति यथा कूर्मः स्वावयवेभ्यः सङ्कोचिविकाशिभ्योन भिन्नः एवं घटमुकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः। एवञ्चेत् तन्तुषु पटइति व्यपदेशो यथेह वने तिलका इत्युपपन्नः। न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः प्रकाशकः पाचकश्चेति। नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्व्वन्ति न तु शिविकावहनं मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्व्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति। स्यादेतत् आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन्वा असंश्चेत् प्राप्तं तर्ह्यसत उत्पादनम्। अथ सन्, कृतं तर्हि कारणव्यापारेण। न हि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः। आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः। तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्ते इति रिक्तं वचः। अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सती असती वा, सती चेत् कृतं तर्हि कारणैः, असती चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था। अथोत्पत्तिः पटान्नार्थान्तरम् अपि तु पटएवासौ तथापि यावदुक्तं भवति पटइति तावदुक्तं भवत्युत्पद्यतइति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्। तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वकारणसत्तासमवायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्य्यन्ते एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियात्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारणत्वाभावात्" व्याख्यातञ्चैतदस्माभिस्तट्टीकायां यथा "तद्धर्मत्वात् तेषां तन्तूनां धर्मत्वात् अवस्थाविशेषात्मकत्वात् स्वसत्त्वनियतसत्ताकत्वाद्वा। तत्सत्त्वनियतसत्ताकत्वरूपहेतुमध्ये एव ऽन्वयव्याप्तेः प्रवेशात् व्यतिरेकव्याप्तिं दर्शयति यत् यतोभिद्यते इत्यादि तथा च व्यापकस्य धर्मत्वाभावस्य निवृत्त्या व्याप्यस्य भेदस्य निवृत्तेरभेदसिद्धिरिति भावः। पक्षे धर्मत्वरूपहेतुसत्त्वप्रदर्शनाय उपनयरूपन्यायाङ्गमाह धर्मश्चेत्यादि। धर्मत्वं च प्रागुक्तम्। निगमयति तस्मान्नार्थान्तरमिति। अन्योऽर्थः पदार्थः अर्थान्तरं मयूरव्यंसकादित्वात् समासे क्लीवता। पटः तन्तुभ्यो न भिन्नः पदार्थः किन्तु अभिन्न एवेत्यर्थः। उपादीयते कार्य्यजननाय विशेषरूपेण गृह्यते इत्युपादानम् कार्य्यस्यानागतावस्थाविशेषाश्रयरूपं कारणं तदाश्रितसूक्ष्मावस्थापन्नं कार्य्यन्तूपादेयं तद्भावात् कार्य्यकारणविशेषरूपत्वादित्यर्थः तथा च कार्य्यस्यानागतावस्थाश्रयत्वमेवोपादानकारणत्वम्, तच्च अनागतावस्थापन्नकार्य्यरूपमेव अन्यस्य दुर्वचत्वात् अन्यथा सर्व एव सर्वकार्य्यजननाय उपादीयेरन् न च तथा उपादीयन्ते। उपादीयन्ते च पटादिजननाय तन्तवः न तु मृदादयः। न च प्रागभाव एव तस्य नियामकः, तस्य अभावत्वेन स्वतोविशेषकत्वाभावात्